International Journal of Sanskrit Research 2022; 8(2): 130-132

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 130-132
© 2022 IJSR
www.anantaajournal.com
Received: 12-12-2021
Accepted: 02-02-2022

**Kamalini Panda**
Research Scholar, Maharaja Sriram Chandra Bhanja Deo University, Baripada, Takatpur, Mayurbhanj, Odisha, India

**Corresponding Author:**
**Kamalini Panda**
Research Scholar, Maharaja Sriram Chandra Bhanja Deo University, Baripada, Takatpur, Mayurbhanj, Odisha, India

# मुरलिध्वनिसप्तते: ध्वनि-रसालंङ्कराणां समीक्षणम्

## Kamalini Panda

**प्रस्तावना**

कवे: महामहोपाध्यायपण्डितगोविन्दचन्द्रमिश्रस्य तृतीयकृतिरस्ति "मुरलीध्वनिसप्तति:" । कवे: महामहोपाध्यायस्य भगवतो रसिकशेखरस्य श्रीकृष्णस्य कदम्बमूलस्थस्य मुरलीध्वनिवर्णना मुरलीध्वनि स्वनानुकृति छन्दसा दृतविलम्बेन रचिता । पठनमात्रेण मनोनिवेश्य चित्तं चमत्कृत्य मोहयति। पवनेन यथा – क्वचित् द्रुतेन क्वचित् वा विलम्बितेन अयं ध्वनि: नितसन् दूरात् दूरं गम्यते । आग्रहवता पवनेन च त्रिभूवनं यावत् मुरलीध्वनि: उपोह्य नियते इति कविना अत्र सप्तत्यां वर्णित: । यत्र यत्र मुरलीनिनाद याति तत्र तत्र किम् भवति इति संपूर्ण श्लोक संचये वर्णितम् । अनुप्रासमधुरा इयं सप्तति: कर्णपीयूषधारेव श्रवणाभ्यां पीयते । तत्र प्रथमश्लोक: भवति –

अलिकुलाकुलगुञ्जनमोहने कुसुमभारभरे प्रियकद्रुमे ।
मुदितहृद्यमुनातट कानने धमति गोपशिशुर्मुरलीध्वनिम् ।।

(मुरलीध्वनिसप्तति: / ०१ पृ. ०१)

तदा यमुनातटं कुसुमित तरुलताभि: मण्डितं आसीत् । तत्र च कदम्बद्रुमे अधिकानि पुष्पाणि अस्फुटन् । तल्लभेन भ्रमरा: तत्र परिपुरिता सन्त: मधुरं गुंजन्ति स्म। केन रसिक शेखरस्य मन: प्रसन्नम् आसीत् । स समुरलीं अधमत् । किन्तु कविरत्र नित्य प्रवृत्त वर्त्तमानकालं (लोट) व्यवहरति । तेन पदध्वनिनां अद्यापि भगवत: कृष्णस्य मुरलीध्वनि: चिन्ताबलेन अनुभूयते इति पदध्वनि: । कदापि श्रीकृष्ण मोहन मुरलीध्वनि: न अस्तमीयात् इति कवे: मानसी विवक्षा । संपूर्ण काव्यसास्य वीजं प्रथमश्लोके कविनां निहितमिति काव्यचमत् कृतिं प्रथमश्लोक एव व्यनक्ति । अथ स कवि: कथं मुरलीध्वनि: केन मार्गेण विश्वं व्याप्नत् तां सरणीं वर्णयति ।

वदन पंकजतो मुरलिंगत: सुपरिपूर्णतनुश्च समुद्भवन् ।
नवशिशु: प्रविभान् धरणीतले वहति गोपशिशोर्मुरलीध्वनि: ।।

(तत्रैव/ ०२ पृ. ०२)

अर्थात् भगवत: गोपशिशोश्रीकृष्णस्य वदन पंकजत: समुद्भूय मुरलीगर्भं गत: । तत: षड्ज आदि स्वनभूषित: संपूर्ण वपुष्मान् नवीन: शिशु: सन् संपूर्णां धरणीं पवनवाहनेन समग्रधरणी तलं व्याप्नत्। वालगोपालस्य मुखपद्मात् निसृत्य सप्तरन्ध्रयुक्त मुरलीगर्भे तिष्ठन् षड्ज ऋषभ आदि सप्तस्वरै: परिपूर्णाद्नन्तरं जनिं लब्ध्वा नवशिशुरूपेण धरणीवक्षसि राजन् तदेव वंशीस्वन: तरङ्गायित सन् सरति । अत्र वंशीस्वन: धरणीवक्षसि स्वतन्त्रतया शोभितत्वात् उपमालंङ्कार: भवति । उपमालंङ्कार हेतो: अलंङ्कारध्वनि: ।

नवशिशुं कुतुकात् तरलान्तरो- हृदयएव निधाय वनानिल: ।
ब्रजति संकलयन् जनमानसं वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव / ०३ पृ. ०३)

अर्थात् ग्रामे दृश्यते नवीनं शिशुं सर्वे आदरेण गृहित्वा हृदये निधाय स्निह्यति । तथैव पवन: एनं शिशुं हृदये निधाय अन्यान् जनान् भक्तान् वा दर्शयन् अर्थात् कर्णविवरद्वारा तेषामन्तरे विशं पुन: प्रत्यावृत्य जनानन्तरं मोहयति । स्वयं स्निहति च । तत्र एवं भूतायां अवस्थायां यमुनातटकदम्बद्रुमे गोपशिशोमुरलीध्वनि: वहति । अत्र लोकव्यवहारे शिशु स्नेहवत् पवनस्य मुरलीध्वनि स्नेह: इति उपमालंङ्कार: ध्वनि: । अत्र प्रस्ताव – देश – कालानां वैशिष्ट्यात् एष ध्वनि: प्रकटित: । कवि: श्रीकृष्णस्य वंशीस्वन: अद्यापि उद्यन् विभाति इति आत्मानुभूतिं प्रकटयन् अन्तपदे वर्त्तमानं क्रियां वहति इति व्यवहरति ।

चपलयन् यमुनाजलवेणिकां विकचयन् ब्रजभीरु मनोऽम्बुजम् ।
तरलयन् मुनिमानसधीरतां वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव / ०४ पृ. ०४)

भगवत: श्रीकृष्णस्य मोहन मुरलीध्वनि: वहन्। यमुनाया: श्रोतोरूपं वेणिकां दोलयति परिवारे पञ्चषट् वर्षियाया: तनुजाया: वेणीं गुरुजना: वात्सल्यस्नेहेन दोलयन्ती कर्षन्ति वा तथैव ध्वनिकरेन भगवान् श्रीकृष्ण: स्व तनुजाया: यमुनाया: वेणीं चपलयति । अत्र पारिवारिक चित्र चित्रणात् स्वभावोक्ति । वालिकाया: परिवारसभ्यानां च व्यवहारस्य यमुना श्रीकृष्णयो: व्यवहारेण तुलनीया तुल्ययोगिता अलंङ्कार: । स्रतोसिबालावेणीत्व आरोपात् रूपकालंङ्कार: । अत्र च भगवत: यमुनां प्रति वात्सल्यं प्रकटितं इति वात्सल्यरस: । “ब्रजभीरू मन: पङ्कजम् विकचयन्” इति अत्र भीरूपदेन ब्रजनारीणां कृष्णप्रिति मयत्वेऽपि शंकाऽशंकया मनोम्बुजम् कर्हिचित् मुद्रितं भवति । किन्तु वेणुस्वन श्रवणेन तत् पुन: व्याकु च तां याति । अत्र मनोम्बुजस्य विकाशरूपं कार्यं मुरलीध्वनिरूपेण कारणेन सिध्यति इति कार्यकारणभाव प्रकटनात् काव्यलिङ्गालंकार: । हृदयविकाशमात्रेण एव गोपिनाम् अन्तरे कृष्णप्रिति समुदिता इति उज्वलरस: । (शृङ्गार:, सृति:, उज्वल: इति अमर:) ‘मुनिमानसं निवात भवनस्थ द्वीप’ इव निश्चलं तथा स्थिरशिखं च तिष्ठति । तेन सुस्थिरचित्तेन ते भगवत्त: चरणारविदं ध्यायन्ति । किन्तु मोहन मुरलीध्वनि: तान् स्थिरदीपशिखातुल्यां मनोवृत्तिं चपलयति । अत्रापि मुनिमानसचपलताया कारणत्वेन मुरलीध्वनेश्च द्वितीयश्लोके शिशुत्व वर्णनात् अत्र शिशु चापल्यभाव: ध्वनित: । एवं रूपेण मुरलीध्वनि: अद्यापि भक्तमानसेषु प्रवहति ।

प्रशमयन् सकलाशम-वेदना: कुसुमयन् शुभचिन्तनवल्लिका: ।
सुषमयन्नखिलं गिरिकाननं वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव/१८ पृ.२२)

अन्तरे अशान्तिं विदुरयितुं कवि: उपायं वर्णयति । भगवत: श्रीकृष्णस्य मुरलीध्वनि: यदा वहति तदा प्राणिनाम् अन्तरे सकला अशान्तिभावना: शान्ता भवति । शीतला शान्ति: समुत्पोद्यते । सत् चिन्तारूपिणी लता कुसुमिता भवति (पुष्पमयी भवति )। अर्थात् वेणुस्वन: श्रवणेन सकल शुभचिन्ता: वहलि भवन्ति । समग्र गिरिकाननं शोभामयं च भवति । अर्थात् लता: पल्लविता वृक्षा: फलभरिता:, नद्य प्रसन्नसलिलाश्च भवन्ति । मरुत् सुखस्पर्शो वाति । अत्र प्रकृते चारुताचित्रण फलेन स्वभावोक्तिरलंङ्कार: ।

विफलयन् स्मरचिन्तनसन्ततिं कुफलयन्नभिलाषपरम्पराम् ।
अचलयन् ब्रजवालपदे मनो –वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव / २० पृ. २५)

अत्र यदा भगवत: श्रीकृष्णस्य मधुरमुरलीध्वनि: प्रवाति तदा नवदंपत्योरपि स्मरचेतना अस्तं याति । तेषां मन: शीतलं सत् श्रीकृष्ण वदनकोमलं स्मरति । अत्र शृङ्गाररसेन परिपुष्ट: शान्तरस: विजयते । मनस: धर्म: भवति अनवरतं कामयते । किन्तु यत्र भगवत: वासुदेवस्य मधुर मुरलीध्वनि: स्वन: संश्रयते तत्र मन: अभिभूतं सत् कामना: परिहरति । अत्र कामनाया: वैफल्याय मुरलीध्वने: कारणत्वात् काव्यालिङ्गालङ्कार: । मनश्च तस्य गोपशिशोचरणे निश्चलं सत् परमानन्द सन्दोहं समश्नुते । मनस: कामनादिभ्य: विरमात् श्रीकृष्ण चरणाम्बुजे संस्थानात् सकलकाम्य वस्तोपेक्षया श्रीकृष्णस्य चरणाम्बुजस्य प्राधान्यात् व्यतिरेकारलंङ्कार: । तथा भगवत: चरणारविन्दे प्रीति: परमसन्तोषाय कल्पेत इति वस्तुध्वनि: । समुदायेन शान्तरस: ।

अति भरन् विषयिब्रजसूक्ष्मकं अतिशयन् सकलाच्युतभावना: ।
अपिदधत् सकलं हृदि दूषणं वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव / २२ पृ. २७)

अत्र कवे: स्वानुभव अभिव्यक्ति: वर्णिता अस्ति । भगवत: वंशीस्वनेन विषयी ब्रजसूक्ष्मकम् अर्थात् स्थून्द्रियाणि सूक्ष्मेन्द्रियाणि च भरितानि भवन्ति । इन्द्रियाणी द्विविधानि भवन्ति । यथा यन्त्री प्रथमं मनसा प्रासादं परिकल्प्य तदनन्तरं तस्य आकारं रेखयति । स मनसा येन प्रकारेण यै: इन्द्रियै: तत् निर्माति तानि इन्द्रियाणि सूक्ष्माणि । अर्थात् स अविद्यमानं भवनं सूक्ष्मेणचक्षुषा पश्यति । एवं च स्वप्ने लोक: भीत: सन् याभ्यां पादाभ्यां धावति तौ पादौ सूक्ष्मपादौ एवं सर्वाणि इन्द्रियाणि सूक्ष्माणि स्थूलाणि चेति द्विविधानि भवन्ति । भगवत: मुरलीवदनस्य वेणुध्वनि: स्थूलेन्द्रियाणि अवसानि करोति । सूक्ष्मेन्द्रियाणि किन्तु परिपूर्णानि करोति । अर्थात् सूक्ष्मकर्णो स्वनेन परिपूर्णो । सूक्ष्मनयने मधुराधरमण्डितवदन दर्शनेन परिपूर्णे सूक्ष्मघाणश्च कदम्बतुलसी सौरभेण भलितम् । एवं सर्वाणि इनद्रियाणि वेणुस्वन: अति भरति । अन्तरे भगवत: विषया या प्रीति सूक्ष्मतया सर्वेषां प्राणिनां विद्यते वंशीस्वन: तां प्रीतिं अतिशयते । तेन स प्राणी भगवति परम प्रीतिमान् भवति । हृदये पूर्वार्जिता या कुचिन्ता पापभावना इति एवमादीनि कुलषाणि तिष्ठन्ति तानि अपि दधाति । इति एवं मानसानि कर्माणि प्राणिनां कुर्वन् गोपशिशोर्मुरलीध्वनि: वहति । वर्हिजगत: वर्णना समाप्य प्राणीनां हृदयान्तरे वंशीस्वनस्य कृतित्वं अत्र नूतनत्वेन वर्णितम् । अत्र अतिशोयक्ति: अलंकारवाच्य: । किन्तु भगवत: वेणुस्वने अकलनीया शक्तिरस्ति इति समन्वयेन सभावोक्ति: । समुदायेन अतिशयक्ति सभावोक्तिसंकर: ।

पथि मृगान् जडभावमुपागतान् खगगणान् तरु पाणिषु धीरयन् ।
विमलशर्मतरङ्गमुपानयन् वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव / ३२ पृ.४१)

कवि: मनुष्येतर प्राणिषु अपि वेणुस्वन प्रभावं वर्णयन् लिखति मार्गे ब्रजन्त पशव: गमनं स्तवितं कृत्वा धिरोभावेन दण्डायमाना: सन्त: वेणुस्वन: श्लुर्वन्ति । खगगणा: वृक्षेशाखासु स्थिरभावेन वसन्त: वेणुस्वन: माकर्णयन्ति । किमु वा निर्मला कापि सुखलहरी गगन पवनेषु प्लवते । इति एवं वर्णना मनुष्यतर प्राणिषु अपि नन्दनन्दनं मोहनमुरली स्वनस्य माधुर्यं प्रकटयति । आनन्दस्य लहरी संपूर्णे गगने तथा पवने च भासते इति अतिशयोक्ति: अलंकार: । एवं वर्णनया सामाजिकस्य अन्तरे कोऽपि अपूर्व: मनोमोहनभाव: समुदीयात् इति कवेरुदेश्यम् ।

लसति वा गगने विमल: शशी स्थिरतनु: पिवतीव सुधां निशा ।
नभसि भालि रपावृतलोचना वहति गोपशिशोर्मुरलिध्वनि: ।।

(तत्रैव / ३३ पृ. ४३)

गोपशिशोनन्दनन्दनस्य मुरलीध्वनि: यदा वहति तदा सुधांशु चन्द्रमा गगने उल्लसित सन् विमलचन्द्रिकया शोभते । शान्तारजनी धवलवसनपरिहिता सती स्थिरतरा विभाति । मन्ये वंशीस्वन: वलयितां चन्द्रसुधां रजनी सच्छन्दतया पिवन्तीव विराजते । तस्या: तारकालिनयनानिस्थिराणि यथा पिपासु पानसमये नयनेस्थिरी

करोति तथैव निशा स्थिरनयना सुधां पिवति । अत्र चन्द्रकिरण सुधाया: आरोप:, रजन्यां च ध्वनिना: पिपासु ता रोप: पारम्परिकरूपकम् । निशा – सुधां – पिवति – इव इति शंकाफलेन उत्प्रेक्षा अलंकार:। समुदायेन श्लोके स्वभावोक्तिरलंकार:। संपूर्ण प्रकृति मुरली निनादेन मोहिनी सती मोदते इति ध्वनि:।

निशिकुचाग्रमुखार्भकसन्तति: मुदितनेत्रतया स्थिरजिह्विका ।
प्रमदभारभरा न च चूषिति वहति गोपशिशोर्मुरलिध्वनि: ।।
(तत्रैव/ ३४ पृ. ४४)

अवोधेषु अर्भकेषु अपि कृष्णवेणुस्वन: स्वप्रभावं प्रकटयति इति शिशव: मातृपयोधर: वृन्तवदनात् अपि न चूषन्ति । तदानीं तेषां जिह्वास्थिरा तिष्ठति । नेत्रद्वयं च मुद्रितं आसीत् । तस्य अन्तरं केवलं आनन्देन परिपूर्णम् । अत्र वंशीस्वनस्य अद्भुतशक्ति वर्णनया अतिशयोक्ति: अलंकार: । क्षीरशोषणरोदेन जिह्वा निश्चला इति नेत्रद्वयं च निमिलितं इति स्वभावोक्तिरलंकार: । अवोधा: यदि एवं आनन्दलहरीषु प्रवमाना: वोधषु वतां कथं स्यात् इति अर्थापत्त्या ते रससागरमग्ना इति ज्ञाप्यते । अर्थापत्तिरलंकार: ।

प्रणयिनीचरमाक्तकरो गज: श्रुतिपुटं यमुनामभितो दधत् ।
पिहितनेत्रगलत्सलिलस्रुति: वहति गोपशिशोर्मुरलिध्वनि: ।।
(तत्रैव / ३७ पृ. ४८)

गजराज: प्रणयिन्या: पृष्ठदेशे स्वं करं निदधान: अपि यस्यां दिशि यमुना भवति तां दिशं प्रति विशालं शृति पुटं निदधाति । कर्णयत: तस्य नयनाभ्यां आनन्दाश्रूणि स स्रवन्ति । स तन्मय: वेणुस्वन: कर्णयति । अत्र वेणुस्वनप्रवाहं कवि: गजराजे प्रतनोति । गजराजनिकटे प्रणयिनिं प्राप्य तस्या: पृष्ठं स करेण आमृषति । इति अवसरे कृष्ण वेणुस्वन: पवनलहरीषु भासमान: समायात् । स च कुजर: हस्तिनि पृष्ठस्थितकर: सन् अपि आर्मषण विरत: वेणुस्वनमोहित: अभवत् । अधिकासक्त सन् कर्णपुटं यमुनाकदम्बदिशं प्रति पातितवान् । तस्य मुद्रितनयनाभ्यां आनन्दाश्रु प्रवहति । अत्र प्रणयिनि पृष्ठे स करं दधान: पूर्वरागात्मिकां प्रीतिं अनुभवति इति रति स्थायीभाव: वेणुस्वनानन्देन पराजित: । येन कर्णपुटं स्वनागमनदिशं प्रति स न्तधात् । अत्र प्रणयिन्या आर्मषणं वेणुस्वनानन्दापेक्षया न्युनं इति वेणुस्वनस्य मोदाधिक्यं ध्वन्यते । तथा प्रियास्पर्शापेक्षया वेणुस्वनं अधिकानन्ददायकं इति व्यतिरेकारलंङ्कारध्वनि: । नेत्राभ्यांगलितं अश्रु प्रियास्पर्शजन्योवा वेणुस्वन श्रवणजन्योवा इति संचये सन्देहालंङ्कार: । अत्र सम्भोगशृङ्गारपरिपुष्ट: शान्तरस: ।

मधुलिहां कुसुमामृतलेहने न हि मति र्वलते च तदा पुन: ।
अधिकवान् विजहाति वहति गोपशिशोर्मुरलिध्वनि: ।।
(तत्रैव / ४६ पृ. ६१)

अर्थात् नन्दनस्य वदनात् मधुरमुरलीध्वनि: प्रवाति । तदा भ्रमराणां कुसुमत: मकरन्दलेहने प्रवृत्ति: स्थगिता अभवत् । कारणं पुष्पमकरन्दापेक्षया वेणुस्वन: अधिकमधुर: भवति । अधिकलाभवान् जन: अल्पं सदा विजहाति इति अर्थान्तरन्यास अलंङ्कार: । मकरन्दापेक्षया वंशीस्वनस्य माधुर्यदिक्य वर्णनात् व्यतिरेका अलंङ्कार: । अत एव अत्र अर्थान्तरन्यासव्यतिरेकयो सङ्कर: । मधुलिहाम् अपि वेणुनादे स्पृहा अधिका इति ते कमरन्दाशनम् अपि विजहु रीति: वेणुस्वनस्य सर्वातिशयित्वं ध्वनिना प्रकटितम् ।

**उपसंहार:**

सारत: कृष्णवेणुस्वन: सर्वाधिकानन्ददायी तथा सकलप्राणी मनोहारि सकल प्रकृति मोददायी इति कवि: क्वचित् अभिधया क्वचित् व्यञ्जनया च वर्णयन् प्रतनुते । सर्वेमपि श्लोक: एक एव च्छन्देन कविनां लिखितम् । द्रुतविलम्बित एव ।

द्रुतविलम्बितमेव ववौ मरु द् द्रुतविलम्बित विम्बरदच्छदात् ।
द्रुतविलम्बित वेणु नदं वहन् द्रुतविलम्बितमेव विशन्मन: ।।
(तत्रैव / ७२ पृ. ९५)

**सहायकग्रन्थसूची**

१. मुरलीध्वनिसप्तति:/मिश्र:गोविन्दचन्द्र/प्रज्ञाप्रकाश:/कटकम्/प्रथमसंस्करण्/२००६ ।
२. संस्कृत-साहित्य का प्रामाणिक इतिहास/डाँ.रमाशंकर त्रिपाठी/चौखम्बा संस्कृत सीरीज आफिस/चौखम्बा कृष्णदास अकादमी/वाराणसी/द्वितीयसंस्करणम्/२००७।
३. संस्कृत निबन्ध शतकम्/पद्मश्री आचार्य: कपिलदेवद्विवेदी/विश्ववद्यिालयप्रकाशनम्/वाराणसी/अष्टमसंस्करणम्/१९९९।